Munbhih Kritam Skandashatashtanama Stotram

# મુનિભિઃ કૃતં સ્કન્દશતાષ્ટનામસ્તોત્રમ્

## Document Information

Text title : Munibhih Kritam Skandashatashtanama Stotram

File name : munibhiHkRRitaMskandashatAShTanAmastotram.itx

Category : subrahmanya, shivarahasya, aShTottarashatanAma, stotra

Location : doc_subrahmanya

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | 38 | 140-155 || See corresponding nAmAvalI

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2025

*sanskritdocuments.org*

# મુનિભિઃ કૃતં સ્કન્દશતાષ્ટનામસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

મુનયઃ ઊચુઃ ।

(ધ્યાનમ્)

દ્વિષડ્ભુજં ષણ્મુખમમ્બિકાસુતં
કુમારમાદિત્યસમાનતેજસમ્ ।
વન્દે મયૂરાસનમગ્નિસન્નિભં
સેનાન્યમીશં સકલેષ્વભીષ્ટદમ્ ॥ ૧૪૦॥

(શતાષ્ટનામસ્તોત્રમ્)

સ્કન્દો ગુહઃ ષણ્મુખશ્ચ ભાલનેત્રસુતઃ પ્રભુઃ ।
પિઙ્ગળઃ કૃત્તિકાસૂનુઃ શિખિવાહો દ્વિષડ્ભુજઃ ॥ ૧૪૧॥

દ્વિષણ્ણેત્રઃ કુમારશ્ચ પિશિતાશનભઞ્જનઃ ।
તારકાસુરસંહર્તા રક્ષોબલનિષૂદનઃ ॥ ૧૪૧॥

મત્તઃ પ્રમત્ત ઉન્મત્તઃ સુરસૈન્યાભિરક્ષકઃ ।
દેવસેનાપતિઃ પ્રાજ્ઞઃ કૃપાલુર્ભક્તવત્સલઃ ॥ ૧૪૨॥

ઉમાસુતો મહાસેનઃ કુમારઃ ક્રૌઞ્ચદારણઃ ।
સેનાનીરગ્રજન્મા ચ વિશાખઃ શઙ્કરાત્મજઃ ॥ ૧૪૩॥

શિવસ્વામી ગણસ્વામી સર્વસ્વામી સનાતનઃ ।
અનન્તશક્તિરક્ષોભ્યઃ પાર્વતીપ્રિયનન્દનઃ ॥ ૧૪૪॥

ગઙ્ગાસુતઃ શરોદ્ભૂત આહુતઃ પાવકાત્મજઃ ।
જૃમ્ભઃ પ્રજૃમ્ભ ઉજ્જૃમ્ભઃ કમલાસનસન્નુતઃ ॥ ૧૪૫॥

એકવર્ણો દ્વિવર્ણશ્ચ ત્રિવર્ણઃ સુમનોહરઃ ।
ચાતુર્વર્ણ્યઃ પઞ્ચવર્ણઃ પ્રજાપતિરહઃપતિઃ ॥ ૧૪૬॥

અગ્નિગર્ભઃ શમીગર્ભો વિશ્વગર્ભઃ સુરારિહા ।
હરિદ્વર્ણઃ શુભકરઃ પટુવાક્ વટુવેષધૃક્ ॥ ૧૪૭॥

પૂષા ગભસ્તિર્ગગનશ્ચન્દ્રવર્ણઃ કલાધરઃ ।
માયાધરો મહામાયઃ કૈલાસાવસથઃ શિખી ॥ ૧૪૮॥

વિશ્વયોનિરમેયાત્મા તેજોનિધિરનામયઃ ।
પરમેષ્ઠી પરબ્રહ્મ વેદગર્ભો વિરાડ્ વસુઃ ॥ ૧૪૯॥

પુલિન્દકન્યાભર્તા ચ મહાસારસ્વતપ્રદઃ ।
આશ્રિતાખિલદાતા ચ ચોરઘ્નો રોગનાશનઃ ॥ ૧૫૦॥

અનન્તશક્તિરાનન્દઃ શિખણ્ડિકૃતકેતનઃ ।
ડમ્ભઃ પરમડમ્ભશ્ચ મહાડમ્ભો વૃષાકપિઃ ॥ ૧૫૧॥

કારણં કાન્તદેહશ્ચ કારણાતીતવિગ્રહઃ ।
અહિરૂપોઽમૃતવપુઃ પ્રાણાયામપરાયણઃ ॥ ૧૫૨॥

વિરુદ્ધહર્તા વીરઘ્નો રક્તશ્યામલલોચનઃ ।
બહુવર્ણો ગણપતિઃ સ્વભક્તાભીષ્ટદાયકઃ ॥ ૧૫૩॥

સર્વેશ્વરો લોકગુરુરસુરાનીકનાશનઃ ।
સુબ્રહ્મણ્યો ગુહઃ સ્કન્દો બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૧૫૪॥

(ફલમ્)

એવમષ્ટોત્તરશતનામભિઃ સ્તૌતિ યો નરઃ ।
તસ્યાભીષ્ટાનિ સર્વાણિ પ્રયચ્છતિ ગુહો મુહુઃ ॥ ૧૫૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મુનિભિઃ કૃતં સ્કન્દશતાષ્ટનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । ૩૮ । ૧૪૦-૧૫૫ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . 38 . 140-155 ..

Notes:

Muni-s મુનયઃ eulogize  Skanda સ્કન્દ with ŚatāṣṭanāmaStotram શતાષ્ટનામસ્તોત્રમ્  towards the conclusion of the discourse of The ŚivaRahasyam શિવરહસ્યમ્.

SkandaŚatāṣṭanāmāvaliḥ સ્કન્દશતાષ્ટનામાવલિઃ derived from the SkandaŚatāṣṭanāmaStotram સ્કન્દશતાષ્ટનામસ્તોત્રમ્, can be accessed from one of the links given below.

Proofread by Ruma Dewan

---

*Munbhih Kritam Skandashatashtanama Stotram*
pdf was typeset on July 28, 2025

Please send corrections to *sanskrit@cheerful.com*